1. अहं वैश्वानरो भूत्वा ... इति श्लोकं पूरयत ?
(15-14)

2. सदोषं अपि कीदृशं कर्म न त्यजेत् ?

सदोषमपि सहजं कर्म न त्यजेत् ।

3. शरीरं तपः किम् ? (17-14)

4. मामकं तेजः किम् ? (15-12)

5. कः गुणातीतः इत्युच्यते ?

समदुःखसुखः स्वस्थः तुल्यप्रियाप्रियः मानापमानयोः मित्रारिपक्षयोश्च तुल्यः, सर्वारम्भ परित्यागी गुणातीतः इत्युच्यते ।

6. यद् अग्रे विषं इव भवति तत् परिणामे किं भवति ?

य                                   अमृतोपमं भवति

7. मद्याजि इति पदस्य कः अर्थः ?

मद्यजन शीलः इत्यर्थः

8 आसुरी सम्पत् का ? (16-4)

9 केन शस्त्रेण सम्सार वृक्षः चेतुं शक्यते ?

दृढेन असङ्गशस्त्रेण संसारवृक्षः चेतुं शक्यते ।

10 किं कर्म न त्याज्यं ? कुतः ?

यज्ञः धानं तपः इत्येतत् त्रिविधं कर्म न त्याज्यं
यतोहि तत् त्रिविधं मनीषिणां फलानभि स पावनं
विशुद्धिकरं अस्ति ।

11 कीदृशं यज्ञं तामसं परिचक्षते ? (17-13)

12 अज्ञानमोहिताः जनाः किं चिन्तयन्ति ?

"आढ्यः अभिजनवान अस्मि" "कोऽन्योऽस्ति सदृशो
मया" "यक्ष्ये" "दास्यामि" "मोदिष्ये इति
अज्ञानमोहिताः जनाः चिन्तयन्ति ।

13 ईश्वरः कुत्र तिष्ठति ?

ईश्वरः सर्वभूतानां हृद्देशे तिष्ठति



14. द्वाविमौ पुरुषो इति श्लोकं पूरयत ? (15-16)

15 सात्विकं सुखं किम् ? (18-37)

16 पञ्चैते तस्य हेतवः इत्यत्र के हेतवः ? (18-14)

17 सात्विकं धानं किम् ? (17-20)

18 ॐ इति उदाहृत्य के प्रवर्त्तन्ते ?
ॐ इति उदाहृत्य विधानोक्ताः यज्ञधानपत क्रियाः
प्रवर्तन्ते ।

19. के आहाराः सात्विक प्रियाः ? (17-8)

20 कान् स्तावत् आसुरनिश्चयान् इति जानीयात् ?
ये अविवेकिनः शरीरस्थ करणसमुदायं भगवन्तं च
कर्शयन्ति, भगवदनुशासनं न पालयन्ति तान् आसुरनिश्च-
यान् भवन्ति ।

21. लोकेस्मिन् कै भूतसर्गौ स्तः ?
लोकेस्मिन् दैवः आसुरश्च इति द्वै भूतसर्गौ स्तः ।

22. दैवीसम्पत् आसुरीसम्पत् च कस्य हेतोः भवतः ?
दैवीसम्पत् विमोक्षाय भवति । आसुरी सम्पत् च निबन्धाय भवति ।

23. नातिमानिता इति पदेन किं बोध्यते ?
अत्यर्थं मानः अतिमानः, सः यस्य विद्यते सः अतिमानी, तस्य भावः अतिमानिता, तदभावः नातिमानिता, आत्मनः पूज्यताद्विषये भावनाभावः ।

24. कथं ब्रह्म सम्पद्यते ? (13-20)

25. अनुमन्ता इत्यस्य कः अर्थः ?
अनुमोदनं कुर्वत्सु तत् क्रियासु परितोषस्तु कर्तान् अनुमन्ता, कार्यकरण प्रवृत्तिषु स्वयं अप्रवृत्तोपि प्रवृत्तः इव तदनुकूलो विभाव्यते तेन अनुमन्ता ।



29. तमसः किरूपं कार्यं उत्पद्यते ?
अप्रकाशः, अप्रवृत्तिः, प्रमादः, मोहः च तमसः विवृद्धे उत्पद्यते ।

30. का इच्छा ?
यज्जातीयमर्थं दुःखहेतुत्वेनानुभूतवान् पुनस्तज्जातीयम

31. क्षेत्रस्य के विकाराः ?
इच्छा द्वेषः सुखं संघातश्चेतना धृतिः मतं क्षेत्रस्य विकाराः ।

32. त्रयोदशः अध्यायः किमर्थं आरभ्यते ?
क्षेत्रक्षेत्रज्ञलक्षणप्रकृतिद्वयनिरूपणद्वारेण ।

33. कार्यं करण कर्तृत्वे इति श्लोकं पूरयत ?
(13-20)

34. क्षेत्रशब्दस्य व्युत्पत्तिं लिखत ?
क्षतत्राणात्, क्षयात्, क्षरणात्, क्षेत्रवद्वा अस्मिन्कर्मफलनिष्पत्तेः क्षेत्रमिति ।

35. क्षेत्रक्षेत्रज्ञ संयोगेन किम् ~~अभिप्र~~ अभिप्रेतम् ?
क्षेत्रक्षेत्रज्ञ संयोग शब्देन क्षेत्रक्षेत्रज्ञयोः विषय विषयिणोः भिन्नस्वभावयोः इतरेतर तद्धर्माध्यास लक्षणः संयोगः अभिप्रेतः ।

36. देहे देहिनं के निबध्नन्ति ?

Scanned by CamScanner

प्रकृति संभवाः सत्वरजस्तमो गुणाः देहे देहिनं निबध्नन्ति ।

37 प्रमादमोहौ कस्मात् गुणात् भवतः ?
प्रमादमोहौ तमो गुणात् भवतः ।

38 परमात्मा कथं पुरुषोत्तमः इति प्रथितः ?
यस्मात् परमात्म क्षर संसारवृक्ष अतीतः भवति, अक्षरात् संसारवृक्ष बीजात् अपि उत्तमः भवति, अतः लोके वेदे च परमात्मा पुरुषोत्तमः इति प्रथिता ।

39. स्वभावज त्रिविधा श्रद्धा का ?
सात्विकी राजसी तामसी चेति देहिनां त्रिविधा श्रद्धा भवति ।

40 शारीरं तपः नाम किम् ?(17-14)

41. कर्मसिद्धेः पञ्च हेतवः के ?
अधिष्ठानं, कर्ता, करणं, विविधाश्च चेष्टाः, दैवं चेति कर्मसिद्धेः पञ्च हेतवः ।

42 स्वभावजं ब्रह्मकर्म किं ? (18-42)

43. सर्वभूतानां हृद्देशे कः तिष्ठति ?
ईश्वरः



44. सञ्जयः कस्य प्रसादात् गीताशास्त्रं श्रुतवान् ?
सञ्जयः व्यासस्य प्रसादात् गीताशास्त्रं श्रुतवान् ।

45 अन्नचतुष्टयं किम् ?
भोज्यं, भक्ष्यं, चोष्यं, लेह्यं इति अन्नं चतुर्विधं ।

46. ब्रह्मणः कः निर्देशः ?
ॐ तत् सत् इति ब्रह्मणः त्रिविधः निर्देशः स्मृतः

47 उपद्रष्टानुमन्ता इति श्लोकं पूरयत ?

48 अध्यात्मज्ञाननित्यत्वं इति श्लोकं पूरयत ?

49. भूतप्रकृतिमोक्ष शब्दस्य कः अर्थः ?
भूतानां प्रकृतिः अविद्या अव्यक्ताख्या, तस्याः मोक्षणं अभावगमनं इति अर्थः ।

50 भगवान् कथं औषधीः पुष्णाति ?
रसात्मकः सोमः भूत्वा भगवान् औषधीः पुष्णाति ।

51. मानवः कथं सिद्धिं विन्दति ?
यस्मात् ईश्वरात् भूतानां प्रवृत्तिः भवति, येन ईश्वरेण सर्वं इदं जगत् व्याप्तं वर्तते, तं ईश्वरं स्वकर्मणा अभ्यर्च्य सिद्धिं विन्दति मानवः ।

52. अश्वत्थं इति पदस्य कः अर्थः ?
न श्वः अपि स्थाता अश्वत्थः, क्षणप्रध्वंसी इत्यर्थः ।

Scanned by CamScanner

अपैशुनं

53 अपैशुनम् इत्यस्य अर्थं लिखत ?
परस्य प्रकटीकरणं पैशुनं, तत् अभावः अपैशुनं ।

54 अशुचि व्रताः के ?
अशुचीनि व्रतानि येषां ते असुराः अशुचिव्रताः ।

55 किं तावत् त्रिविधं नरकस्य द्वारं
कामः, क्रोधः तथा लोभः एतत् त्रयं नरकस्य द्वारं

56 पर्युषितत्वं कस्य प्रियं भवति ?
पर्युषितत्वं तामसस्य पुरुषस्य प्रियं भवति ।

57 केशिनिषूदन इति पदस्य अर्थः कः ?
केशी नाम हयच्छद्मा असुरः, तं निषूदितवान् भगवान् वासुदेवः, अतः भगवान् श्रीकृष्णः एव केशिनिषूदनः ।

58 कः संन्यासः कश्च त्यागः ?
काम्यानां कर्मणां परित्यागः संन्यासः इत्युच्यते, सर्वकर्मफलत्यागः त्यागः इत्युच्यते ।

59 भगवता कः पुरुषव्याघ्रः इति निर्दिष्टः ?
भगवता अर्जुनः पुरुषव्याघ्रः इति निर्दिष्टः

60 नैष्कर्म्यसिद्धिः का ?
निर्गतानि कर्माणि यस्मात् सः निष्कर्मा, तस्य भावः नैष्कर्म्यं निष्क्रियात्मस्वरूपावस्थानं, तस्य सिद्धिः निष्पत्तिः नैष्कर्म्यसिद्धिः इत्युच्यते ।

61 तामसः यज्ञः कः ? (17-13)



62 भगवतः परमम् धाम कीदृशं वर्तते ?
यत् वैष्णवं पदं गत्वा न निवर्तन्ते, यच्च सूर्यादिः न भासयते, तत् भगवतः विष्णोः परमम् धाम भवति

63 गुणानां अतिक्रमणेन जीवः किं प्राप्नोति ?
यः जीवः परमात्मानं अव्यभिचारेण भक्तियोगेन सेवते सः गुणान् समतीत्य ब्रह्मभूयाय कल्पते, मोक्षाय समर्थो भवति इत्यर्थः ।

64 सत्त्वादिगुणाः कथं सुखादिषु सञ्जयन्ति ?
सत्त्वादिगुणाः अन्यौ गुणौ अभिभूय यथा उद्भवन्ति अर्थात् वर्तन्ते, तथा सुखादिषु सञ्जयन्ति ।

65 स्थैर्यं नाम किम् ?
स्थैर्यं नाम स्थिरभावः स्थिरज्ञानः मोक्षमार्गे एव कृताध्यवसायत्वं ।

66 ब्रह्म स्वयं सर्वेषां पिता कथं उच्यते ? (14-4)

67 किं सात्त्विकं दानं स्मृतं ?
दातव्यम् इति यत् दानं दीयते अनुपकारिणे । देशे काले च पात्रे च तत् दानं सात्त्विकम् स्मृतं ।

68 कर्मणां त्रिविधं फलं किम् ?
अनिष्टम्, इष्टं, मिश्रं च कर्मणः त्रिविधं फलं

69 कः कर्ता ? राजसः परिकीर्तितः
(18-27)

Scanned by CamScanner

70. का बुद्धिः बन्ध मोक्षौ वेत्ति ?
सात्विकी बुद्धिः बन्ध मोक्षौ वेत्ति ।

71. क्षेत्रं किम् कश्च क्षेत्रज्ञः ?
इदं शरीरं क्षेत्रं इति अभिधीयते । एतत् शरीरं यः जानाति सः क्षेत्रज्ञः इत्युच्यते ।

72. कः क्षरः कश्च अक्षरः ?
(15 - 16)

73. देहि कथं बन्धयुक्तो भवति ?
प्रकृति संभवाः सत्वरजस्तमो गुणाः अव्ययं देहिनं देहे निबध्नन्ति

74. गुणानां किं फलं भगवता उक्तं ?
सात्विकस्य कर्मणः निर्मलं फलं, रजसस्तु फलं दुःखं, अज्ञानं तमसः फलं

75. कः त्यागी इत्युच्यते ?
यः कर्मफलत्यागी सः त्यागी इत्युच्यते ।

76. नैष्कृतिकः कः ?
नैष्कृतिकः परवृत्ति छेदन परः

7[illegible] विविक्तसेवी इत्यस्य कोऽर्थः ?
अरण्य नदी पुलिन गिरि गुहादीन् विविक्तान् देशान् सेवितुं शीलं अस्य इति विविक्तसेवी ।

मद्व्यपाश्रयः इति पदस्य कः अर्थः ?
अहं वासुदेवः ईश्वरः व्यपाश्रयः यस्य



सः मद्व्यपाश्रयः मय्यर्पित सर्वात्मभावः इत्यर्थः ।

79. का नाम तृष्णा ?

80. आसङ्गः कः ?

81. को नाम प्रमादः ?
कर्तव्यस्य अकरणं प्रमादः ।

82. लोभः नाम किम् ?

83. न तद् भासयते इति श्लोकं पूरयत ?
(15 - 6)

84. नरकस्य द्वारं कतिविधं ?
नरकस्य द्वारं त्रिविधं - कामः, क्रोधः, लोभः ।

85. कानि कर्माणि न त्यक्तव्यानि किमर्थं ?
यज्ञः दानं तपः इत्येतानि कर्माणि न त्यक्तव्यानि, यतोहि तानि मनीषिणां पावनानि सन्ति ।

86. संसारवृक्षस्य पर्णानि कानि ?
ऋक् यजुःसामलक्षणानि छन्दांसि संसार वृक्षस्य पर्णानि ।

Scanned by CamScanner

87. ईश्वर सर्वभूतानां इति श्लोकं पूरयत ?
(18 - 61)

88. देहिनां स्वभावजा श्रद्धा कतिविधा ?
त्रिविधा । सात्त्विकी, राजसी, तामसी चेति ।

89. कः परमां गतिं याति ? कथं च ?
यः सर्वत्र समवस्थितं ईश्वरं समं पश्यन् आत्मना आत्मानं न हिनस्ति सः परां गतिं याति ।

90. आत्मा कथं नोपलिप्यते ? तत्र दृष्टान्त कः ?
देहे यथा सर्वगतं आकाशं सौक्ष्म्यात् न उपलिप्यते तथा सर्वत्र अवस्थितः आत्मा न उपलिप्यते ।

91. ज्ञेयं किम् ? तत् ज्ञात्वा किम् अश्नुते ?
अनादिमत् परं ब्रह्म ज्ञेयं । तत् ज्ञात्वा अमृतमश्नुते ।

92. निर्मानमोहाः इति पदस्य व्युत्पत्तिं लिखत ?
मानश्च मोहश्च मानमोहौ, तौ निर्गतौ येभ्य ते निर्मानमोहाः

93. आशापाशशतैर्बद्धाः इति पदस्य अर्थं लिखत ?
आशा एव पाशाः आशापाशाः, तेषां शतं आशापाशशतं, तैः बद्धाः नियन्त्रिताः सन्तः सर्वतः आकृष्यमाणाः ।

कामक्रोधपरायणाः इति पदस्य व्युत्पत्तिं लिखत ?
कामश्च क्रोधश्च कामक्रोधौ, कामक्रोधौ परं अयनं परः आश्रयः येषां ते कामक्रोधपरायणाः



95. कः इमान् लोकान् न हन्ति न निबध्यते च ?
यस्य अहंकृतः भावः न भवति, यस्य च बुद्धिः न लिप्यते, सः इमान् लोकान् हत्वा अपि न हन्ति न निबध्यते च ।

96. कीदृशं दानं तामसं उदाहृयते ?
अदेशकाले अपात्रेभ्यश्च यत् दानं दीयते, यच्च असत्कृतं अवज्ञातं च भवति तत् दानं तामसं इत्युच्यते ।

97. लोके कति पुरुषाः के च ते ?
लोके द्वे पुरुषौ - क्षरः, अक्षरश्च ।

98. ~~क्षेत्रक्षेत्रज्ञौ कौ~~
~~इदं शरीरं क्षेत्रं~~

98. प्रकृति संभवाः गुणाः के ?
सत्त्वं रजः तमः इति गुणाः प्रकृति संभवाः ।

99. अव्यभिचारिणि भक्तिः का ?
ईश्वरं नारायणं सर्वभूतहृत्स्थितं यतिः कर्मणा वा न कदाचित् यः व्यभिचरति

100. पञ्चदश अध्याये कति श्लोकाः सन्ति ?

त्रयोदशोऽध्यायः → क्षेत्रक्षेत्रज्ञयोगः - 34
चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः - 27
पञ्चदशोऽध्यायः - पुरुषोत्तमयोगः - 20
षोडशोऽध्यायः - दैवासुरसम्पद्विभागयोगः - 24
सप्तदशोऽध्यायः - श्रद्धात्रयविभागयोगः - 28
अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः - 78

## 6 Mark

1. ऊर्ध्वं गच्छन्ति सत्त्वस्थाः इति श्लोकं विलिख्य यथा भावं व्याख्यात ?

(14) "ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्य गुण वृत्तस्था अधो गच्छन्ति तामसाः ॥"

सत्त्वगुण वृत्तस्थाः जीवाः सत्त्वस्थाः इत्यभिधीयते। ते च जीवाः ऊर्ध्वं गच्छन्ति, देवलोकादिषु उत्पद्यन्ते इत्यर्थः । राजसास्तु जीवाः मध्ये तिष्ठन्ति, मनुष्येषु उत्पद्यन्ते । जघन्यश्च असौ गुणश्च जघन्यगुणः तमोगुणः । तस्य वृत्तं निद्रालस्यादिकं । तस्मिन् स्थिताः मूढाः जघन्यगुण वृत्तस्थाः इत्युच्यन्ते । ते च मूढाः अधः गच्छन्ति । तामसाः पश्वादिषु उत्पद्यन्ते इत्यर्थः । एवं रूपेण भावं पूर्वोक्तस्य श्लोकस्य अर्थः वर्णितः अस्ति ।

2. दैवी सम्पत् यथा ग्रन्थं प्रतिपादयत



अभयं अभीकता । सत्त्वशुद्धिः परवञ्चन माया अनृतादि परिवर्जनं । ज्ञानयोगव्यवस्थितिः ज्ञान शास्त्र आचार्यतश्च आत्मादि पदार्थानां अवगमः । दान अन्नादीनां यथा शक्ति संविभाग । दमः इन्द्रियाणां उपशमः । यज्ञः अग्नि अग्निहोत्रादिकं । स्वाध्यायः वेदाध्ययनं । तपः शारीरादिकं । आर्जवम् सर्वदा ऋजुत्वं ।
अहिंसा प्राणिनां पीडावर्जनं । सत्यं अप्रिय अनृतवर्जितं यथाभूतार्थवचनम । अक्रोधः क्रोधाभाव । त्यागः संन्यासः । शान्तिः अन्तःकरणस्य उपशमः । अपैशुनम् अपिशुनता । दया कृपा । अलोलुप्त्वं अलोलुप्त्वम् अविक्रियत्वं । मार्दवं मार्दवं अक्रौर्यम् । ह्रीः लज्जा । अचापलम् अचापलत्वम ।
तेजः प्रागल्भ्यं । शौचम् मन
अक्रोध

त्रयोदशाध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः ।
चतुर्दशाध्यायः - गुणत्रयविभागयोगः ।
पञ्चदशाध्यायः - पुरुषोत्तमयोगः ।
षोडशाध्यायः - दैवासुरसम्पद्विभागयोगः ।
सप्तदशाध्यायः - श्रद्धात्रयविभागयोगः ।
अष्टादशाध्यायः - मोक्षसंन्यासयोगः ।

त्रयोदशोऽध्यायः

1. त्रयोदशाध्यायः किमर्थं आरभ्यते ?
क्षेत्रक्षेत्रज्ञलक्षणप्रकृतिद्वयनिरूपणद्वारेण तद्वत् ईश्वरस्य तत्त्वनिर्धारणार्थं क्षेत्राध्यायः आरभ्यते ।

2. त्रिगुणात्मिका प्रकृति किमर्थं देहेन्द्रियाद्याकारेण संबध्यते ?
त्रिगुणात्मिका प्रकृति पुरुषस्य भोगापवर्गार्थं देहेन्द्रियाद्याकारेण संबध्यते ।

3. क्षेत्रं इति पदस्य व्युत्पत्ति लिखत ?
क्षतत्राणात्, क्षयात्, क्षरणात्, क्षेत्रवत् वा अस्मिन् कर्मफलनिष्पत्तेः क्षेत्रं इति ।

4. के तद्विदः ?
क्षेत्रक्षेत्रज्ञौ ये विदन्ति, ते तद्विदः भवन्ति ।

5. "क्षेत्रज्ञं चापि मां विद्धि" इति श्लोकस्य अर्थं लिखत ?
सर्वक्षेत्रेषु यः क्षेत्रज्ञः अनेक शरीरे उपाधि प्रविभक्तः तं निरस्तसमस्त उपाधिभेदं सदसदादि शब्दप्रत्यय अगोचरं विद्धि इत्यर्थः ।

6. ईश्वरस्य संसारसंसारित्वं संसारिणः अभावः इत्येतत्



दोषद्वयं कथं परिह्रियते ?
ज्ञानाज्ञानयोः अन्यत्वं आश्रय पूर्वकं दोषद्वयं परिह्रियते ।

7. शास्त्रानर्थक्यं इति दोषः कथं परिह्रियते ?
शास्त्रस्य अविद्वत् पुरुष विषयत्वं उक्त्वा परिह्रियते ।

8. कस्य अविद्या ?
यस्य विद्यते तस्य अविद्या ।

9. सुखदुःखे चादयः कस्य धर्माः
सुखदुःखे चादयः क्षेत्रस्य धर्माः

10. अमानित्वादिकं ज्ञानं इति किमर्थं उच्यते ?
अमानित्वादीनां ज्ञानसाधनत्वात् ज्ञानत्वव्यवहारं भवति ।

11. किं ज्ञात्वा अमृतं अश्नुते ?
अनादिमत् परं ब्रह्म ज्ञात्वा अमृतं अश्नुते ।

12. सदसद्योनिजन्मसु अस्य संसारस्य कारणं किं ?
अविद्या, गुणेषु च सक्तः कामः संसारस्य कारणम् ।

13. कः भूयः न अभिजायते ?
यः पुरुषं गुणैः सह प्रकृतिं च वेत्ति सः पुनः न अभिजायते ।

14. "यः पश्यति सः पश्यति" इत्यस्य अर्थं लिखत ?
सर्वेषु ब्रह्मादिस्थावरान्तरेषु प्राणिषु अविनश्यन्तं परमात्मानं एकं यः पश्यति स एव यथार्थतया पश्यति ।

## चतुर्दशोऽध्यायः

1. चतुर्दश अध्यायः किमर्थं आरभ्यते ?
सर्वं उत्पद्यमानं क्षेत्रक्षेत्रज्ञ संयोगात् कथं उत्पद्यते इत्येतत् प्रतिपादयितुं चतुर्दश अध्यायः आरभ्यते । अथवा कस्मिन् गुणे कथं सङ्गः, के वा गुणाः कथं वा ते बद्धन् बध्नन्ति, गुणेभ्यश्च मोक्षः कथं, मुक्तस्य च किं लक्षणं इत्येतत् बोधयितुं चतुर्दश अध्यायः आरभ्यते ।

2. मम साधर्म्यं आगताः इत्यस्य अर्थं लिखत ।
मम परमेश्वरस्य साधर्म्यं मत् स्वरूपता, न तु समानधर्मतां प्राप्ताः इत्यर्थः ।

3. त्रिगुणात्मिका प्रकृति 'महद्' कथं भवति ।
सर्वकार्येभ्यः महत्वात् भरणाच्च स्वविकाराणां महद् इति त्रिगुणात्मिका प्रकृतिः एव विशिष्यते ।

4. देहिनां के कुत्र निबध्नन्ति ?
प्रकृति सम्भवाः सत्त्वरजस्तमो गुणाः देहे अव्ययं देहिनं निबध्नन्ति ।

5. सत्त्वं कुत्र संजयति ?
सत्त्वं सुखे संजयति, रजः कर्मणि संजयति, तमः तु ज्ञानं आवृत्य प्रमादे संजयति ।

सत्त्वं विवृद्धं इति कथं ज्ञातव्यं ?
अस्मिन् देहे सर्व द्वारेषु यदा प्रकाशः ज्ञानं उपजायते तदा सत्त्वं विवृद्धं इति ज्ञायते ।

कः ऊर्ध्वं गच्छति ?
सत्त्वस्थाः ऊर्ध्वं गच्छति । राजसाः मध्ये तिष्ठति । तामसाः अधः गच्छति ।



## षोडश अध्यायः

1. षोडशाध्यायः किमर्थं आरभ्यते ?
नवमे अध्याये प्राणिनां दैवी आसुरी च प्रकृति सूचिता तस्याः विस्तरेण प्रदर्शनाय षोडशः अध्यायः आरभ्यते ।

2. दैवासुरसम्पदोः कार्यं किं ?
आसुरिसम्पत्तु अनर्थानि बन्धाय भवति ।

3. असुराः किं न विदुः ?
प्रवृत्तिं निवृत्तिं च असुरा न विदुः ।

4. असुरेषु किं न विद्यते ?
शौचं, आचारः, सत्यं च असुरेषु न विद्यते ।

5. भगवान् कान् आसुरीषु एव योनिषु क्षिपति
संसारे ये नराधमाः क्रूराः द्विषन्तः असुराः सन्ति तान् आसुरीषु एव योनिषु भगवान् क्षिपति ।

6. नरकस्य द्वारं किं ?
कामः, क्रोधः, लोभः इति त्रिविधं नरकस्य प्राप्तौ द्वारं भवति ।

7. कः सिद्धिं न अवाप्नोति ?
यः शास्त्रविधिं उत्सृज्य कामकारकः वर्तते सः सुखं परागतिं, सिद्धिं च अवाप्नोति ।

8. कार्यं अकार्यं व्यवस्थायां किं प्रमाणम् ?
कार्याकार्यव्यवस्थायां शास्त्रमेव प्रमाणम् ।

Scanned by CamScanner

## सप्तदशोऽध्यायः

1. सात्विकाः कान् यजन्ते ?
सात्विका देवान् यजन्ते, राजसाः यक्षरक्षांसि यजन्ते, तामसाः प्रेताः भूतगणान् यजन्ते ।

2. के असुराः ?
ये अशास्त्रविहितं घोरं तपः तप्यन्ते, अहङ्कारवन्तः कामरागपीडिताश्च ते असुराः

3. सात्विकः आहारः कः

4. त्रिविधः तपः
शारीरं

5. सत् इति शब्दः कुत्र प्रयुज्यते ?
सत् भावे साधुभावे प्रशस्ते कर्मणि च सच्छब्दः प्रयुज्यते ।

6. ब्रह्मणः त्रिविधः निर्देशः कः
ओं, तत्, सत् इति ब्रह्मणः त्रिविधः निर्देशः

7. ब्रह्मवादिनां यज्ञदानतपः क्रियाः किं उच्चार्य सततं प्रवर्तन्ते ?
ओङ्कारमुच्चार्य ब्रह्मवादिनां यज्ञदानतपः क्रिया सततं प्रवर्तन्ते ।

8. किं असत् उच्यते ?
अश्रद्धया हुतं दत्तं कृतं तपः तप्तं असत् इत्युच्यते ।



## अष्टादशोऽध्यायः

1. अष्टादशाध्यायः किमर्थं आरभ्यते ?
सर्वस्य गीता शास्त्रस्य अर्थं सर्वश्च वेदार्थं वक्तव्यः इत्येतदर्थं अष्टादशः अध्यायः आरभ्यते ।

2. अष्टादश अध्यायस्य आदौ अर्जुनस्य का जिज्ञासा आसीत् ?
संन्यासत्यागशब्दयोः कः अर्थः इति जिज्ञासा अर्जुनस्य आसीत् ।

3. केशिनिषूदन इति पदस्य व्युत्पत्तिं लिखत
केशिनामानं असुरं भगवान् वासुदेवः निषूदितवान्, अतः केशिनिषूदन इति उच्यते ।

4. कवयः कः संन्यासं विदुः
कवयः काम्यानां कर्मणां न्यासं संन्यासं विदुः ।

5. विचक्षणानां मते कः त्यागः ?
सर्वकर्मफलत्यागः एव त्यागः इति विचक्षणाः प्राहुः

6. कः त्यागी इत्यभिधीयते ?
यः कर्मफलत्यागी सः त्यागी इत्यभिधीयते ।

7. सर्वकर्मणां सिद्धये कति कारणानि प्रोक्तानि कानि च तानि ?
पञ्चकारणानि अपेक्षितानि । तानि च अधिष्ठानं, कर्ता, करणं, विविधाः चेष्टा दैवं चेति ।

8. कर्मचोदना कति विधा
ज्ञानं, ज्ञेयं, परिज्ञाता इति त्रिविधा कर्मचोदना ।

9. कर्मसंग्रहः कतिविधः

करणं, कर्म, कर्ता इति त्रिविधः कर्मसंग्रहः।

10 नरः संसिद्धिं कथं लभते ?
स्वे स्वे कर्मणि अभिरतः संसिद्धिं लभते नरः।

11. परधर्मात् कः श्रेयान् ?
विगुणः अपि स्वधर्मः परधर्मात् श्रेयान्

12. किं कुर्वन् किल्बिषं न आप्नोति ?
स्वभावनियतं कर्म कुर्वन् किल्बिषं न आप्नोति।

13 सर्वारम्भा केन आवृताः ?
सर्वारम्भा धूमेन अग्निः इव दोषेण आवृताः।

14 परमां नैष्कर्म्यसिद्धिं कः अधिगच्छति ?
सर्वत्र असक्तबुद्धिः जितेन्द्रियः विगतस्पृहः संन्यासेन परमां नैष्कर्म्यसिद्धिं अधिगच्छति।

15 कः ब्रह्मभूयाय कल्पते ?
अहङ्कारम् बलम्, दर्पम्, कामम्, क्रोधम्, परिग्रहम् च विमुच्य निर्ममः शान्तः ब्रह्मभूयाय कल्पते।

16 सर्वभूतानां हृद्देशे कः तिष्ठति ?
ईश्वरः हृद्देशे सर्वभूतानां हृद्देशे तिष्ठति।

17 मन्मनाभव इति श्लोकं पूरयत।
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे॥

18. गीताशास्त्रस्य उपसंहारः कुत्र भवति ?



सर्वधर्मान् परित्यज्य इत्यादि श्लोके।

19 धर्मं अधर्मं च इति श्लोकं पूरयत ?
त्यज धर्मं अधर्मं च उभे सत्यानृते त्यज।
उभे सत्यानृते त्यक्त्वा येन त्यजसि तत् त्यज॥

20 गीताशास्त्रे परमनिःश्रेयससाधनं किं निश्चितं ?
ज्ञानं निःश्रेयससाधनं इति निश्चितं।

21. कर्मणा मोक्षः कुतः न आरभ्यते ?
मोक्षस्य नित्यत्वात्।

22. नित्यस्य कर्मणः फलं किं ?
प्रत्यवायपरिहारः चित्तशुद्धिश्च नित्यकर्मणः फलं

23. भगवतः उपदेशं श्रुत्वा अर्जुनः किं उवाच ?
नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव॥

24. यत्र योगेश्वरः कृष्णः धनुर्धरः पार्थश्च भवतः तत्र किं स्यात् ?
यत्र योगेश्वरः कृष्णः यत्र च धनुर्धरः पार्थः तत्र श्रीः, विजयः, भूतिः, ध्रुवानीतिः च भवति।

## पञ्चदशोऽध्यायः

1. पञ्चदशः अध्यायः किमर्थं आरभ्यते ?
आत्मतत्त्वविज्ञानेन मोक्षो भवति इत्यतः आत्मतत्त्वनिरूपणाय "ऊर्ध्वमूलं" इत्यादि पञ्चदशः अध्यायः आरभ्यते।

Scanned by CamScanner

2. वृक्षरूपककल्पना किमर्थं निरूपिता ?
वैराग्यजननार्थम् ।

3. तत्त्वज्ञाने कस्य अधिकारः
संसारात् विरक्तस्य भगवान् तत्त्वज्ञाने अधिकारः

4. वेदाः कथं संसारवृक्षस्य परिरक्षणं कुर्वन्ति ?
वेदाः धर्माधर्मतद्धेतुफलप्रदर्शनैः द्वारा

5. संसारवृक्षस्य सुविरूढमूलस्य छेदनं केन शस्त्रेण कर्तव्यम् ?
दृढेण असङ्गशस्त्रेण संसारवृक्षस्य छेदनं कर्तव्यम् ।

6. के अव्ययं पदं गच्छन्ति ?
निर्मानमोहाः जितसङ्गदोषाः अध्यात्मनित्याः विनिवृत्तकामाः
द्वन्द्वैः विमुक्ताः अमूढाः अव्ययं पदं गच्छन्ति ।

7. भगवतः परमं धाम किं ?
यद् सूर्योऽपि न भासते, यद् वैष्णवं पदं गत्वा न
निवर्तन्ते तत् भगवतः परमं धाम ।

8. "तत्तेजो विद्धि मामकं" इत्यस्य अर्थं लिखत ?
यत् जगतः भासकं आदित्यस्य तेजः यत् च
चन्द्रमासः अग्नेः च तेजः तत् वस्तुतः भगवतः विष्णोः तेजः ।

9. अन्नं कतिविधं ? काश्च ताः विधाः ?
अन्नं चतुर्विधं । भोज्यं, भक्ष्यं, चोष्यं, लेह्यम् ।

10. सर्वैः वेदैः कः वेद्यः ?
सर्वैः वेदैः परमात्मा वेद्यः ।



11. कः अक्षर इति उच्यते
कूटस्थ अक्षरः उच्यते ।

12. कूटस्थ इति पदस्य कोऽर्थः
कूटः राशिः कूट इव तिष्ठति इति कूटस्थ

13. उत्तम पुरुषः
परमात्मा

श्रद्धायाः त्रैविध्यम् निरूपयत

सप्तदशाध्यायस्य आदौ अर्जुनः भगवन्तं श्रीकृष्णं अपृच्छत्, यत् "श्रद्धया विताः सन्तः अपि ये शास्त्रविधिं वर्तन्ते तेषां सत्त्वरजस्तमोगुणेषु का निष्ठा इति । अस्य प्रश्नस्य उत्तरकथनावसरे भगवता श्रीकृष्णेन श्रद्धायाः त्रैविध्यम् निरूपितम् । सात्त्विकी श्रद्धा तावत् देवपूजाविषयिणी भवति । राजसी श्रद्धा तु यक्षराक्षसानां पूजाविषयिणी भवति । प्रेतपिशाचादि पूजाविषया तमोगुणनिवृत्ता तामसी श्रद्धा भवति । श्रद्धायाः त्रैविध्यम् श्लोकेऽस्मिन् निकथन वर्तते -
यजन्ते सात्त्विका देवान्
यक्षरक्षांसि राजसाः प्रेतान् भूतगणांश्चान्ये
यजन्ते तामसा जनाः इति । एवं रूपेण श्रद्धायाः त्रैविध्यम् श्रद्धात्रयविभागयोगाख्य सप्तदशस्य अध्यायस्य आदावेव निरूपितं वर्तते ।

★ ब्रह्मणः त्रिविधं निर्देशं व्याख्यात ?

सप्तदशाध्यायस्य अन्तिमभागे ब्रह्मणः त्रिविधः निर्देशः स्मृतः वर्तते । ब्रह्मविद्भिः वेदान्तेषु ब्रह्मणः "ओं तत् सत्" इत्येवं त्रिविधः नामनिर्देशः चिन्तितः अस्ति । तेन त्रिविधेन निर्देशेन वेदस्य यज्ञस्य पुरा निर्मिताः । अतः ओंकारं उच्चार्य एव यज्ञदानतपः क्रियाः शास्त्रोक्त प्रकारेण प्रवर्तन्ते । एवमेव मुमुक्षुभिः फलं अनभिसन्धाय तत् इति ब्रह्माभिधानं समुच्चार्य विविधाः कर्मकलापा निर्विघ्नं निवर्त्यन्ते । सद्भावे साधुभावे च सत् इत्येतत् प्रयुज्यते विवाहादि प्रशस्ते कर्माणि अपि सत् पद प्रयुज्यते । यज्ञे तपसि दाने च या स्थिति सा अपि सत् इति च उच्यते । अतः विगुणं अपि कर्म श्रद्धापूर्वकं क्रियमाणं सत् ब्रह्मणः अभिधानत्रयप्रयोगेण सगुणं सात्विकं सम्पादितं भवति । एवं रूपेण त्रिविधः ब्रह्मनिर्देशः शास्त्रेषु दृश्यते ।

★ गुणातीतस्य स्वरूपं लिखत ?

भगवद्गीतायाः चतुर्दशे अध्याये सत्वरजस्तमसां त्रयाणां गुणानां स्वरूपं प्रतिपादितं वर्तते तत्रैव च अन्ते अर्जुनः भगवन्तं श्रीकृष्णं अपृच्छत् गुणातीतस्य लक्षणं तत् उत्तरत्वेन भगवान् गुणातीतस्य स्वरूपं निरूपयति । गुणातीतस्यावत संप्रवृत्तानि न द्वेष्टि, न च निवृत्तानि कांक्षति । सः उदासीनवत् आसीनो भवति । अर्थात् न कस्यचित् पक्षं भजते । गुणैः तस्य विचालनं न कर्तुं शक्यते । सः सुखेषु दुःखेषु वा प्राप्तेषु समः भवति । सः सर्वदा



स्वस्थः अर्थात् प्रसन्नो भवति । किञ्च गुणातीतः समलोष्टाश्मकाञ्चनः, तुल्यप्रियाप्रियः धीरः भवति । किञ्च निन्दायां प्रशंसायां वा अस्य मनः विक्षिप्तं न भवति । अतः एव वयं मानापमानयोः मित्रारिपक्षयोः च तुल्यः भवति । एवं च सर्वबन्धककर्मपरित्यागी एव गुणातीतः भवति इति भगवतः श्रीकृष्णः अभिप्रायः ।

★ आसुरी सम्पत् आसुरी योनिप्राप्तये कारणं इति विचारयत ।

भगवद्गीतायाः षोडशे अध्याये दैवी सम्पत् आसुरि सम्पत् च विस्तरेण निरूपिता वर्तते । तत्र आसुरि सम्पत् निबन्धाय भवति । अर्थात् संसारकारणं भवति इत्यपि निरूपितम् । तत्र तावत् अशुचयः अनाचारश्च असुरः ईश्वरं अनङ्गीकुर्वन्तः दम्भमानमदान्वित विषयभोगेषु रमन्ते । कामभोगेषु प्रसक्ता ते अशुचौ नरके पतन्ति । यतोहि ते अहङ्कारं बलं, दर्पं, कामं, क्रोधं च आश्रिता सन्ति । अतः भगवान् तान् क्रूरान् नराधमान् आसुरीषु योनिषु एव क्षिपामि इति प्रतिजानीते । प्रतिजन्म आसुरीं योनिं प्राप्ता मूढाः मां अप्राप्यैव अधमां गतिं यान्ति । कामः क्रोधः लोभश्च इत्येतत् त्रिविधं नरकस्य द्वारं अस्ति । असुराः अनेन द्वारेण एव गच्छन्तः आसुरीं योनिं प्राप्नुवन्ति । एवं रूपेण आसुरीसम्पत् आसुरीयोनि प्राप्तये कारणं इति षोडशे अध्याये विचारं वर्तते

Scanned by CamScanner

★ तपसः भेदान् उल्लिख्य तस्य सत्वादिस्वरूपं विचारयत

श्रीमद् भगवद्गीतायाः श्रद्धात्रयविभागयोगाख्ये तपसः त्रैविध्यं निरूपितं वर्तते । त्रिविधं तपः तत्र स्मर्यते । शारीरं तपः, वाङ्मयतपः, मानसं तपः चेति । किं नाम शारीरं तपः इति चेत् उच्यते देवद्विजगुरुप्राज्ञ पूजनं शौचं आर्जवं, ब्रह्मचर्यं, अहिंसा च शरीरम् तपः भवति । अनुद्वेगकरं सत्यं प्रियहितम् च यद्वाक्यं स्वाध्याय अभ्यासः च वाङ्मयतपः इत्युच्यते । मनःप्रसादः सौम्यत्वं, मौनं, मनोनिग्रहः भावसंशुद्धिः मानसं तपः । पुनरपि सात्विकं, राजसं, तामसं चेति त्रिविधं । फलेच्छां विना श्रद्धया कृतं विना सात्विकं इत्युच्यते । सत्कारमान पूजार्थं दम्भेन क्रियमाणं तपः राजसं भवति । अविवेकेन स्वशरीरपीडाजनकं, परस्य विनाशाय च क्रियमाणं तपः तामसं तपः भवति । एवं रूपेण तपसः भेदाः सप्तदशे अध्याये निरूपिता भवन्ति ।

★ सत्वरजस्तमोगुणानां स्वरूपं निरूपयत ।

सत्वरजस्तमोगुणानां स्वरूपं श्रीमद्भगवद्गीतायाः अध्याये वर्णितं वर्तते । सत्वं तावत् निर्मलं प्रकाशकम् अनामयं च वर्तते । किञ्च तत् सुखसङ्गेन ज्ञानसङ्गेन च बध्नाति । यदा सर्वद्वारेषु अस्मिन् देहे प्रकाशः उपजायते तदा सत्वगुणः वर्धितः अस्ति इत्यवगन्तव्यम् । सत्वगुणे प्रवृद्धे यः मनुष्यः मरणं प्राप्नोति सः उत्तमविदां लोकान् प्रतिपद्यते । सत्वात् ज्ञानं संजायते । सत्वस्था ऊर्ध्वं गच्छन्ति । रजोगुणः तु रागात्मकः वर्तते । स च तृष्णाया आसङ्गेन च उद्भवति । रजः



कर्माणि कर्मणि सञ्जयति लोभः, प्रवृत्तिः, आरम्भः, स्पृहा इत्यादयः सर्वे रजोगुणस्य वर्धिते लिङ्गं भवति । रजसः दुःखं फलं रजः लोभः संजायते । तमोगुणः तु अज्ञानजः वर्तते । तत् तमः प्रमाद - आलस्य - निद्राभिः निबध्नाति । किञ्च ज्ञानं आवृत्य तमः प्रमादे संजयति । तमसि प्रलीनः मूढयोनिषु जायते । अज्ञानं तमसः फलं प्रमादमोहौ च तमसः एव भवतः । एवं रूपेण चतुर्दशे अध्याये गुणत्रयस्य वर्णनं कृतं वर्तते ।

★ क्षत्रियस्य स्वभावं कर्म किं इति यथा प्रश्नं प्रतिपादयत ?

अष्टादशे अध्याये चतुर्णामपि वर्णाः स्वभावप्रभवैः गुणैः कर्माणि प्रविभक्तानि सन्ति इत्युक्तं । तत्र तावत् क्षत्रियस्य स्वभावजं कर्म किं इति जिज्ञासायां उच्यते -

"शौर्यं तेजो धृतिः दाक्ष्यं
युद्धे चाप्यपलायनम् ।
दानं ईश्वरभावश्च क्षात्रं
कर्म स्वभावजं ॥

श्लोकेस्मिन क्षत्रियस्य स्वभावजं कर्म निरूपितं वर्तते । तथाहि - शौर्यं नाम शूरस्य भावः । तेजः तु प्रागल्भ्यं । धृति पदस्य धारणं इत्यर्थः । दाक्ष्यं तावत् दक्षता अर्थात् सहसा प्रत्युत्पन्नेषु कार्येषु अव्यामोहेन प्रवृत्तिः । किञ्च युद्धे क्षत्रियेण पलायनं न कर्तव्यं । दानं नाम देयेषु मुक्तहस्तता ।

प्रभुशक्तिप्रकटीकरणमेव ईश्वरभावः एवं च शौर्य प्रभृति ईश्वरभावपर्यन्तं क्षत्रियस्य स्वभावजं विहितं कर्म निरूपितं वर्तते ।

श्रद्धायाः त्रैविध्यं निरूपयत ?

सप्तदश अध्यायस्य आदौ भगवन्तं श्रीकृष्णं अपृच्छत् यत् श्रद्धयान्विताः अपि ये शास्त्रविधिं उत्सृज्य वर्तन्ते तेषां सत्त्वरजस्तमोगुणेषु का निष्ठा इति । अस्य प्रश्नस्य उत्तरकथनावसरे भगवता श्रीकृष्णेन श्रद्धायाः त्रैविध्यं निरूपितं सात्त्विकी श्रद्धा तावत् देवपूजाति विषयिणी भवति राजसी श्रद्धा तु यक्षरक्षसानां पूजा विषयिणी भवति । प्रेतपिशाचादि पूजाविषया तमोगुण निवृत्ता नामसी श्रद्धा भवति । श्रद्धायाः त्रैविध्यं श्लोके अस्मिन् विवृतं वर्तते । यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः । एवं रूपेण श्रद्धायाः त्रैविध्यं श्रद्धात्रयविभागयोगा नामस्य सप्तदशस्य अध्यायस्य अन्तर्गतं निरूपितं वर्तते ।

ब्रह्मणः त्रिविधं निर्देशम् व्याख्यात ?

सप्तदशाध्यायस्य अन्तिमभागे ब्रह्मणः त्रिविधं निर्देशः स्मृतः वर्तते । ब्रह्मविद्भिः वेदान्तेषु ब्रह्मणः ॐ तत् सत् इत्येवं त्रिविधः नामनिर्देशः चिन्तितः अस्ति । तेन त्रिविधेन निर्देशेन वेदस्य यज्ञस्य पुरा निर्मिताः । अतः ॐकारं आचार्य एव यज्ञदानतपः क्रियाः शास्त्रे प्रवर्तन्ते । एवं एव मुमुक्षुभिः फलं अभिसन्धाय



तद् इति ब्रह्माभिधानं समुच्चार्य विविधाः कर्मक्रियाः निर्विकल्प क्रियन्ते । सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते । यज्ञे तपसि दानेऽपि च यास्मिन् सा अपि कर्म श्रद्धापूर्वकं क्रियमाणं सत् ब्रह्मणः अभिधानत्रय प्रयोगेण सगुणं सात्त्विकं सफलं भवति एवं रूपेण त्रिविधः ब्रह्मणः निर्देशः शास्त्रे दृश्यते ।

संसारवृक्षं गीतावाक्योऽनुदिशा वर्णयत ?

आत्मतत्त्वस्य परिज्ञानाय अनात्मसु पदार्थेषु वैराग्यं अपेक्षितं । तदर्थं अस्य परिकल्प्यमानस्य प्रपञ्चस्य वृक्षरूपककल्पनया भगवद्गीता पञ्चदशे अध्याये 'ऊर्ध्वमूलमधःशाखा' इत्यादिना निरूप्यते । अस्य संसारस्य माया शबलितं ऊर्ध्वपदवाच्यं ब्रह्मैव मूलं । तस्य अधः महत् अहङ्कारतन्मात्रादि शाखाः इव वर्तन्ते । ऋक्यजुःसाम रूपाणि छन्दांसि पर्णानि इव संसारपरिरक्षणार्थानि । पर्णैः एव किल वृक्षः परिरक्ष्यते । अस्य संसारवृक्षस्य नाम अश्वत्थः इति । अश्वत्थः शब्दस्य व्युत्पत्तिः श्वः अपि न तिष्ठति इति अश्वत्थः । अयं वृक्षः सत्त्वरजस्तमोगुणैः सर्वदा परिवर्धमानः अस्ति । अस्य अवान्तरशाखाः तत्र तत्र प्रादुर्भवन्ति । अन्यः अयं वृक्षः असङ्गरूपेण दृढेन शस्त्रेण मुमुक्षुभिः छेदनीयः । एवं रूपेण संसारवृक्षस्य वर्णनं भगवद्गीतायाः पञ्चदशे अध्याये वर्णितं वर्तते ।

"न सत्तत् असदुच्यते" इत्यस्य अभिप्रायं स्फुटयत ?

भगवद्गीतायाः त्रयोदशे अध्याये वेदान्तशास्त्रस्य प्रमेयं वक्ष्यामि इति प्रतिज्ञा भगवता श्रीकृष्णेन कृतं "अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते"। तस्य अयं अभिप्रायः - ब्रह्म यद् ज्ञानेनैव ज्ञेयं तद् सत् न । सत्असत्आदि शब्दैः शक्त्या न उच्यते । सर्वेहि शब्दाः अर्थप्रकाशनाय प्रयुज्यते । शब्दप्रवृत्तिनिमित्तानि जात्यादि चतुर्विधं शास्त्रे प्रसिद्धं । यथा गौः इति पदं गोत्वजाति प्रवृत्ति निमित्तकम् , पाचकः इति पदं क्रिया प्रवृत्ति निमित्तकं , नीलं इति पदं गुणं प्रयुज्य एताद्दशजातिक्रिया गुणाः ब्रह्मणि न सन्ति । अतः ब्रह्म ब्रह्म सतादि शब्दवाच्यं न भवति । यतो वाचो निवर्तन्ते इत्यादि श्रुतेः । अन्यः ब्रह्म सत् न । तर्हि ब्रह्मणि असत्वं अस्ति वा इति जिज्ञासायां न असत् इत्युक्तं गीतायां । जात्यादि सत्वव्यवहारस्य ब्रह्मणि नास्ति । शशकवत् ब्रह्मणि अपि नास्ति । इत्यं इत्येतत् बोधयितुं असत्वं अपि नास्ति । न सत् न असत् उच्यते ।

पुरुषोत्तमयोगस्य सारः (पञ्चदश अध्यायस्य सारम्)

श्रीमद् भगवद्गीतायां पञ्चदश अध्यायः भवति पुरुषोत्तमयोगः इति । अध्यायेऽस्मिन् अर्जुनेन अपृष्टोऽपि भगवान् श्रीकृष्णः आत्मनः तत्वं विवृणोति । तत्रादौ वैराग्योत्पादनाय वृक्षरूपककल्पनया संसारस्वरूपं वर्णयति ऊर्ध्वमूलं इत्यादिना । संसारात् विरक्तस्य किल भगवत्तत्त्वज्ञाने अधिकारः न अन्यस्य । एवं अनादि संसारवृक्षं निरूप्य तस्य छेदने असङ्ग एव शस्त्रं इति निरूपयति , पुत्रवित्तलोकैषणाभ्युदयाभ्यां एव वितृष्णः अत्यासाभ्यां संसारवृक्षस्य छेदनं कथ्यते कर्तुं ।



एवं रूपेण संसारवृक्षं स बीजं उद्धृत्वा वैष्णवं पदं ज्ञातव्यम् येन च मुक्तो स्यात् । निर्मानमोहाः जितेन्द्रियाः सन्यासिनः मोक्षाधिकारिः सन्तः । विष्णोः परमं पदं प्राप्नुवन्ति । किं तत् भगवतः परमं धाम इति जिज्ञासायां उच्यते । यत् धाम सूर्यः , चन्द्रः , अग्निः वा न भासते , यत् च गत्वा न निवर्तन्ते साधकाः यत् परमं धाम । भगवतः अंशः एव रूपेण संसरति तस्य इन्द्रियाणि तु स्वभाव वशात् विषयेषु आकृष्टानि भवन्ति । किञ्च मनः अधिष्ठाय अयं जीवः स्वकीयैः इन्द्रियैः शब्दादीन् विषयान् उपसेवते । एताद्दशजीवः वस्तुतः परमात्मैव इति मूढाः न अनुपश्यन्ति । विवेकसम्पन्नाः तु प्रत्यक्षमिव ब्रह्म पश्यति । भगवतः विष्णोः परमं पदं प्रकारेण निरूप्यते , यद् आदित्य गतं तेजः इत्यादिना । सर्वे विभूतयः लोके दृश्यमानाः भगवतः एव ऐश्वर्यशक्तिः भगवान् वैश्वानरो भूत्वा प्राणिनां देहं आश्रित्य अन्नं पचति । ईश्वर एव सर्वभूतानां हृति तिष्ठति । स्मृतेः अनुभवस्य कारणं ईश्वर एव । सर्वेषां वेदान्ति शास्त्राणां प्रतिपाद्यं परब्रह्म एव । अयमेव परमात्मा उत्तमः पुरुषः इति कथ्यते । लोकत्रयं प्रविश्य अयं अव्ययः ईश्वरः एव लोकान् बिभर्ति एताद्दशं पुरुषोत्तमं यः प्रत्यक्षमिवत्वेन जानाति सः सर्ववित् स्वयमेव पुरुषोत्तमत्वं प्रविशति । ब्रह्मविद् ब्रह्मैव भवति इति श्रुतेः परमं एताद्दशं परमं रहस्यं श्रीकृष्णः अर्जुनाय उपदिष्टम् । एतत् परमार्थं तत्वं ज्ञात्वा अर्जुनः कृतार्थो भवति इति भगवत अभिप्रायः । एवं रूपेण पुरुषोत्तमयोगस्य सारः संग्रहीतुं शक्यते ।

Scanned by CamScanner

17th lesson

श्रद्धा - सात्त्विकम्, राजसम्, तामसम्

यजन्ते सात्त्विका देवान्
यक्षरक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये
यजन्ते तामसा जनाः ॥

सात्त्विकानां प्रियम् ->

आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥

राजसानाम् प्रियम्

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥

तामसानाम् प्रियम्

यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥

सात्त्विक यज्ञं

अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो च इज्यते ।
यष्टव्यमेति मनः समाधाय स सात्त्विकः ॥



राजस यज्ञम्

अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥

तामस यज्ञम्

* विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥

* देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥

* अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥

* मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥

त्रयोदशोऽध्यायः

क्षेत्रक्षेत्रज्ञप्रकृतिद्वयनिरूपणद्वारेण तद्वद् ईश्वरस्य तत्त्वनिर्धारणार्थं क्षेत्राध्यायः आरभ्यते ।

2, 5, 6, 7, - श्लोके (imp) ✓

* इच्छा - यज्जातीयं सुखहेतुम् अर्थं उपलब्धवान्
पूर्वं पुनः तज्जातीयं उपलभ्यमानः
तं आदातुं इच्छति सुखहेतुं ।

* द्वेषम् -> यज्जातीयं अर्थं दुःखहेतुत्वेन अनुभूतवान् पुनः तज्जातीय उपलभ्यमानः तं द्वेष्टि

* सुखम् -> अनुकूलं प्रसन्नं सत्त्वात्मकम् ।

* दुःखम् -> प्रतिकूलात्मकम्

* संघातः -> देहेन्द्रियाणां संहतिः

* धृतिः -> यया अवसादप्राप्तानि देहेन्द्रियाणि ध्रियन्ते ।

* अमानित्वम् - मानिनो भावो मानित्वं आत्मनः श्लाघनं तदभावः अमानित्वम् ।

* अदम्भित्वम् - स्वधर्मप्रकटीकरणं दम्भित्वम्, तदभावः अदम्भित्वम् ।

* अहिंसा -> प्राणिनां अपीडनम् ।

* क्षान्तिः -> परापराधप्राप्तौ अविक्रिया ।

* आर्जवम् -> ऋजुभावो अवक्रत्वम् ।

* आचार्योपासनम् -> मोक्षसाधनोपदेष्टुः आचार्यस्य शुश्रूषादिप्रयोगेण सेवनम् ।

* शौचम् -> कायमलानां मृज्जलाभ्यां प्रक्षालनम्, मनसः रागादिमलानां नाशनम् ।

* स्थैर्यम् -> स्थिरभावो मोक्षमार्गे एव कृताध्यवसायित्वम् ।



* आत्मविनिग्रहः -> आत्मनः अपकारकस्य आत्मशब्दवाच्यस्य कार्यकारणसंघातस्य विनिग्रहः ।

* वैराग्यम् -> शब्दादिषु दृष्टादृष्टेषु भोगेषु विरागभावः

* अनहङ्कारः -> अहङ्काराभावः

* असक्तिः - सक्तिः सङ्गनिमित्तेषु विषयेषु प्रीतिमात्रं तदभावः असक्तिः ।

* अनभिष्वङ्गः -> अभिष्वङ्गाभावः, अभिष्वङ्गो नाम सक्तिविशेषः एव अनन्यात्मभावनालक्षणः

* विविक्तदेशसेवित्वम् - विविक्तः स्वभावतः संस्कारेण वा अशुच्यादिभिः सर्पव्याघ्रादिभिः विविक्तः देशः तं सेवितुं शीलं यस्य विविक्तदेशसेवी तद्भावो विविक्तदेशसेवित्वम् ।

* ध्यानम् -> शब्दादिभ्यो विषयेभ्यः श्रोत्रादीनि करणानि मनसि उपसंहृत्य, मनः च प्रत्यक् चेतयितरि एकाग्रतया यत् चिन्तनं तत् ध्यानम् ।

* संख्यम् -> इमे सत्त्वरजस्तमांसि गुणाः मया दृश्या अहं तेभ्यः अन्यः तद्व्यापारसाक्षिभूतो नित्यो गुणविलक्षण आत्मा इति चिन्तनम् ।

* योग -> ईश्वरार्पणबुद्ध्या अनुष्ठीयमानं घटनारूपं योगार्पणम् योग इति ।

Scanned by CamScanner